विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग दशम् विषय संस्कृत विषयशिक्षक श्यामउदय सिंह

ता: 27-05-2021 (एन.सी.ई.आर.टी. पर आधारित)

**पाठः - 4 शिशुलालनम्**

---

1. **अधोलिखिताना प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**

  i. रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः कीदृशः आसीत्?
  ii. रामः लवकुशौ कुत्र उपवेशयितुम् कथयति?
  iii. बालभावात् हिमकरः कुत्र विराजते?
  iv. कुशलवयोः वंशस्य कर्ता कः?
  v. केन सम्बन्धेन वाल्मीकि कुशलवयोः गुरुः आसीत्?
  vi. कुशलवयोः मातरं वाल्मीकि केन नाम्ना आह्वयति?

**उत्तराणि-**

  vii. रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः हृदयग्राही आसीत्।
  viii. रामः लवकुशौ अङ्कम्/सिंहासनम् उपवेशयितुम् कथयति।
  ix. बालभावात् हिमकरः पशुपति-मस्तके विराजते।
  x. कुशलवयोः वंशस्य कर्ता सहस्रदीधितिः।
  xi. उपनयनोपदेशेन वाल्मीकिः कुशलवयोः गुरुः आसीत्।
  xii. कुशलवयोः मातरं वाल्मीकिः वधूः नाम्ना आह्वयति।

2. **रेखाङ्कितेषु पदेषु विभक्तिं तत्कारण च उदाहरणानुसार निर्दिशत-**

| | | **विभक्तिः** | **तत्कारणम्** |
|---|---|---|---|
| **यथा-** | राजन्! अलम् अतिदाक्षिण्यैन। | तृतीया | 'अलम्' योगे |
| i. | रामः लवकुशौ <u>आसनार्धम्</u> उपवेशयति। | _____ | _____ |

| | | | |
|---|---|---|---|
| ii. | धिङ् <u>माम्</u> एवं भूतम्। | _____ | _____ |
| iii. | अङ्कव्यवहितम् अध्यास्यतां <u>सिंहासनम्</u>। | _____ | _____ |
| iii. | अलम् <u>अतिविस्तरेण</u>। | _____ | _____ |
| iv. | <u>रामम्</u> उपसृत्य प्रणभ्य च। | _____ | _____ |

3. **उत्तराणि-**
   i. 'उपवेशयति' इति पदस्य कारणेन द्वितीया विभक्तिः अस्ति।
   ii. 'धिङ् (धिक्)' अव्यय कारणेन द्वितीया विभक्तिः अस्ति।
   iii. 'अध्यास्यताम्' इति पदस्य कारणेन द्वितीया विभक्ति अस्ति।
   iv. 'अलम्' अव्यय कारणेन तृतीया विभक्तिः अस्ति।
   v. 'उपसृत्य' इति पदस्य कारणेन द्वितीया विभक्ति अस्ति।

4. **यथानिर्देशम् उत्तरत्-**
   i. 'जानाम्यहं तस्य नामधेयम्' अस्मिन् वाक्ये कर्तृपदं किम्?
   ii. 'किं कुपिता एवं भणति उत प्रकृतिस्था'-अस्मात् वाक्यात् 'हर्षिता' इति पदस्य विपरीतार्थकपदं चित्वा लिखत।
   iii. विदूषकः (उपसृत्य) 'आज्ञापयतु भवान्!' अत्र भवान् इति पदं कस्मै प्रयुक्तम्?
   iv. 'तस्माङ्क-व्यवहितम् अध्याख्याताम् सिंहासनम्'-अत्र क्रियापदं किम्?
   v. 'वयसस्तु न किञ्चिदन्तरम्'-अत्र 'आयुषः' इत्यर्थे किं पदं प्रयुक्तम्?

**उत्तराणि-**

vi. अहम्
vii. कुपिता
viii. रामः
ix. अध्यास्याताम्
x. वयसस्तु